॥ वाल्मीकि रामायण॥

७ उत्तरकाण्ड

अध्याय २२

स तु तस्य महानादं श्रुत्वा वैवस्वतो यमः ।
शत्रुं विजयिनं मेने स्वबलस्य च सङ्क्षयम् ॥ १॥

स तु योधान्हतान्मत्वा क्रोधपर्याकुलेक्षणः ।
अब्रवीत्त्वरितं सूतं रथः समुपनीयताम् ॥ २॥

तस्य सूतो रथं दिव्यमुपस्थाप्य महास्वनम् ।
स्थितः स च महातेजा आरुरोह महारथम् ॥ ३॥

पाशमुद्गरहस्तश्च मृत्युस्तस्याग्रतो स्थितः ।
येन सङ्क्षिप्यते सर्वं त्रैलोक्यं सचराचरम् ॥ ४॥

कालदण्डश्च पार्श्वस्थो मूर्तिमान्स्यन्दने स्थितः ।
यमप्रहरणं दिव्यं प्रज्वलन्निव तेजसा ॥ ५॥

ततो लोकास्त्रयस्त्रस्ताः कम्पन्ते च दिवौकसः ।
कालं क्रुद्धं तदा दृष्टवा लोकत्रयभयावहम् ॥ ६॥

दृष्टवा तु ते तं विकृतं रथं मृत्युसमन्वितम् ।
सचिवा राक्षसेन्द्रस्य सर्वलोकभयावहम् ॥ ७॥

लघुसत्त्वतया सर्वे नष्टसञ्ज्ञा भयार्दिताः ।
नात्र योद्धुं समर्थाः स्म इत्युक्त्वा विप्रदुद्रुवुः ॥ ८॥

स तु तं तादृशं दृष्टवा रथं लोकभयावहम् ।
नाक्षुभ्यत तदा रक्षो व्यथा चैवास्य नाभवत् ॥ ९॥

स तु रावणमासाद्य विसृजञ्शक्तितोमरान् ।
यमो मर्माणि सङ्क्रुद्धो राक्षसस्य न्यकृन्तत ॥ १०॥

रावणस्तु स्थितः स्वस्थः शरवर्षं मुमोच ह ।
तस्मिन्वैवस्वतरथे तोयवर्षमिवाम्बुदः ॥ ११॥

ततो महाशक्तिशतैः पात्यमानैर्महोरसि ।
प्रतिकर्तुं स नाशक्नोद्राक्षसः शल्यपीडितः ॥ १२॥

नानाप्रहरणैरेवं यमेनामित्रकर्शिना ।
सप्तरात्रं कृते सङ्ख्ये न भग्नो विजितोऽपि वा ॥ १३॥

ततोऽभवत्पुनर्युद्धं यमराक्षसयोस्तदा ।
विजयाकाङ्क्षिणोस्तत्र समरेष्वनिवर्तिनोः ॥ १४॥

ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ।
प्रजापतिं पुरस्कृत्य ददृशुस्तद्रणाजिरम् ॥ १५॥

संवर्त इव लोकानामभवद्युध्यतोस्तयोः ।
राक्षसानां च मुख्यस्य प्रेतानामीश्वरस्य च ॥ १६॥

राक्षसेन्द्रस्ततः क्रुद्धश्चापमायम्य संयुगे ।
निरन्तरमिवाकाशं कुर्वन्बाणान्मुमोच ह ॥ १७॥

मृत्युं चतुर्भिर्विशिखैः सूतं सप्तभिरर्दयत् ।
यमं शरसहस्रेण शीघ्रं मर्मस्वताडयत् ॥ १८॥

ततः क्रुद्धस्य सहसा यमस्याभिनिविःसृतः ।
ज्वालामालो विनिश्वासो वदनात्क्रोधपावकः ॥ १९॥

ततोऽपश्यंस्तदाश्चर्यं देवदानवराक्षसाः ।
क्रोधजं पावकं दीप्तं दिधक्षन्तं रिपोर्बलम् ॥ २०॥

मृत्युस्तु परमक्रुद्धो वैवस्वतमथाब्रवीत् ।
मुञ्च मां देव शीघ्रं त्वं निहन्मि समरे रिपुम् ॥ २१॥

नरकः शम्बरो वृत्रः शम्भुः कार्तस्वरो बली ।
नमुचिर्विरोचनश्चैव तावुभौ मधुकैटभौ ॥ २२॥

एते चान्ये च बहवो बलवन्तो दुरासदाः ।
विनिपन्ना मया दृष्टाः का चिन्तास्मिन्निशाचरे ॥ २३॥

मुञ्च मां साधु धर्मज्ञ यावदेनं निहन्म्यहम् ।
न हि कश्चिन्मया दृष्टो मुहूर्तमपि जीवति ॥ २४॥

बलं मम न खल्वेतन्मर्यादैषा निसर्गतः ।
संस्पृष्टो हि मया कश्चिन्न जीवेदिति निश्चयः ॥ २५॥

एतत्तु वचनं श्रुत्वा धर्मराजः प्रतापवान् ।

अब्रवीत्तत्र तं मृत्युमयमेनं निहन्म्यहम् ॥ २६ ॥

ततः संरक्तनयनः क्रुद्धो वैवस्वतः प्रभुः ।
कालदण्डममोघं तं तोलयामास पाणिना ॥ २७ ॥

यस्य पार्श्वेषु निश्छिद्राः कालपाशाः प्रतिष्ठिताः ।
पावकस्पर्शसङ्काशो मुद्गरो मूर्तिमान्स्थितः ॥ २८ ॥

दर्शनादेव यः प्राणान्प्राणिनाम् उपरुध्यति ।
किं पुनस्ताडनाद्वापि पीडनाद्वापि देहिनः ॥ २९ ॥

स ज्वालापरिवारस्तु पिबन्निव निशाचरम् ।
करस्पृष्टो बलवता दण्डः क्रुद्धः सुदारुणः ॥ ३० ॥

ततो विदुद्रुवुः सर्वे सत्त्वास्तस्माद्रणाजिरात् ।
सुराश्च क्षुभिता दृष्ट्वा कालदण्डोद्यतं यमम् ॥ ३१ ॥

तस्मिन्प्रहर्तुकामे तु दण्डमुद्यम्य रावणम् ।
यमं पितामहः साक्षाद्दर्शयित्वेदमब्रवीत् ॥ ३२ ॥

वैवस्वत महाबाहो न खल्वतुलविक्रमः ।
प्रहर्तव्यं त्वयैतेन दण्डेनास्मिन्निशाचरे ॥ ३३ ॥

वरः खलु मया दत्तस्तस्य त्रिदशपुङ्गव ।
तत्त्वया नानृतं कार्यं यन्मया व्याहृतं वचः ॥ ३४ ॥

अमोघो ह्येष सर्वासां प्रजानां विनिपातने ।
कालदण्डो मया सृष्टः पूर्वं मृत्युपुरस्कृतः ॥ ३५ ॥

तन्न खल्वेष ते सौम्य पात्यो राक्षसमूर्धनि ।
न ह्यस्मिन्पतिते कश्चिन्मुहूर्तमपि जीवति ॥ ३६ ॥

यदि ह्यस्मिन्निपतिते न म्रियेतैष राक्षसः ।
म्रियेत वा दशग्रीवस्तथाप्युभयतोऽनृतम् ॥ ३७ ॥

राक्षसेन्द्रान्नियच्छाद्य दण्डमेनं वधोद्यतम् ।
सत्यं मम कुरुष्वेदं लोकांस्त्वं समवेक्ष्य च ॥ ३८ ॥

एवमुक्तस्तु धर्मात्मा प्रत्युवाच यमस्तदा ।
एष व्यावर्तितो दण्डः प्रभविष्णुर्भवान्हि नः ॥ ३९ ॥

किं त्विदानीं मया शक्यं कर्तुं रणगतेन हि ।
यन्मया यन्न हन्तव्यो राक्षसो वरदर्पितः ॥ ४० ॥

एष तस्मात्प्रणश्यामि दर्शनादस्य रक्षसः ।
इत्युक्त्वा सरथः साश्वस्तत्रैवान्तरधीयत ॥ ४१ ॥

दशग्रीवस्तु तं जित्वा नाम विश्राव्य चात्मनः ।
पुष्पकेण तु संहृष्टो निष्क्रान्तो यमसादनात् ॥ ४२ ॥

ततो वैवस्वतो देवैः सह ब्रह्मपुरोगमैः ।
जगाम त्रिदिवं हृष्टो नारदश्च महामुनिः ॥ ४३ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com